**३ – तुदादिगणे न गुणः**

भ्वादिगणः तुदादिगणः इत्यनयोः विकरणप्रत्ययस्य अनुबन्ध–लोपानन्तरम्, 'अ' एव अवशिष्यते इति अस्माभिः दृष्टम् | तयोः गणयोः तिङन्तपदानां साम्यम् अपि अस्ति— यथा भ्वादौ 'भवति', तुदादौ 'लिखति'— उभयत्र 'ति' इत्यस्मात् पूर्वम् अकारः | तर्हि किमर्थं गणद्वयम् ? एतावता प्रायः सर्वे जानीयुः यत् भ्वादिगणे गुणकार्यं भवति, तुदादिगणे च गुणकार्यं निषिध्यते | अस्मिन् पाठे किमर्थं तुदादिगणे गुणः न भवति इति परिशीलयिष्यामः |

दृष्टान्ते, भू–धातुः इगन्तः अस्ति | शप्–प्रत्यये परे इगन्त–भू–धातोः ऊकारस्य गुणादेशो भवति, **सार्वधातुकार्धधातुकयोः** (७.३.८४) इति सूत्रेण | बुध्–धातोः उपधायां लघु इक्–वर्णः अतः शप्–प्रत्यये परे तस्य बुध्–धातोः उकारस्य गुणादेशो भवति **पुगन्तलघूपधस्य च** (७.३.८६) इति सूत्रेण | आहत्य भ्वादिगणे इगन्तधातूनाम् इक्–वर्णस्य गुणः; उपधायां ह्रस्व–इक्–वर्णस्य गुणः च | अधुना तुदादिगणे तत् अवस्थाद्वयम् अस्ति चेदपि गुणः न | इत्युक्तौ, (१) इगन्तधातूनाम् इक्–वर्णस्य गुणः न; (२) तथा हि उपधायां ह्रस्व–इक्–वर्णस्य गुणः न | यद्यपि तुदादिगणे श–विकरणप्रत्ययः शित् अस्ति (भ्वादिगणस्य शप् इव), तथापि तुदादौ गुणः न भवति |

भ्वादिगणस्य धात्वङ्गे गुणः यत्र यत्र भवति, तस्य गुणस्य कारणम् अस्माभिः ज्ञायते | इगन्तधातुः भवतु, लघूपधधातुः भवतु, उभयत्र गुणस्य निमित्तं शप् इति विकरणप्रत्ययः |

शप्–विकरणप्रत्यये शकारस्य इत्–संज्ञा, लोपः च इति कारणतः शप् "शित्" (यस्य शकरः इत्, सः शित्); **तिङ्–शित्सार्वधातुकम्** इत्यनेन सूत्रेण शप् सार्वधातुकम्; शप् सार्वधातुकसंज्ञक–प्रत्ययः इति कारणात् **सार्वधातुकार्धधातुकयोः** इति सूत्रेण इगन्तधातौ इकः गुणः, **पुगन्तलघूपधस्य च** इति सूत्रेण धातोः उपधायां ह्रस्व–इकः गुणः च इति दृष्टवन्तः | नाम गुणकार्ये शपः प्रेरणादायिनी शक्तिः अस्ति इति ज्ञातवन्तः |

अधुना तुदादिगणे विकरणप्रत्ययः श; स च विकरणप्रत्ययः श इत्यस्य शकारस्य इत्–संज्ञा, लोपः च इति कारणतः श "शित्" (यस्य शकरः इत्, सः शित्); **तिङ्–शित्सार्वधातुकम्** इत्यनेन सूत्रेण श–प्रत्ययः सार्वधातुकसंज्ञकः; तर्हि तुदादिगणे अपि **सार्वधातुकार्धधातुकयोः** इति सूत्रेण इगन्तधातौ इकः गुणः भवेत्, **पुगन्तलघूपधस्य च** इति सूत्रेण धातोः उपधायां ह्रस्व–इकः गुणः च भवेत् | इदं सर्वं सत्यं सत्यपि गुणः न भवति | तर्हि कः भेदः ? श–प्रत्यये गुणकार्यार्थं प्रेरणादायिनी शक्तिः अस्ति चेत्, किमर्थं भ्वादिगणे यत्र गुणः भवति, तत्र तुदादिगणे न भवति ?

अत्र केचन प्रश्नाः

– शपि (शप् प्रत्यये) पकारस्य किं कार्यम् ?
– पकारः नास्ति चेत् कः प्रभावः ?
– तुदादि गणे विकरणप्रत्ययः श एव, शप् न; नाम, पकारः नास्ति | तर्हि पकारस्य अभावे किं भवति ?

अस्माकम् अध्ययनस्य आरम्भे एव एवम् उक्तम् आसीत् –

१) विकरणप्रत्यये इत्–संज्ञक–शकारस्य कार्यं— गुणस्य कृते प्रेरयति | (धातौ अन्तर्भूतस्य स्वरस्य गुणं कारयति |)
२) विकरणप्रत्यये इत्–संज्ञक–पकारस्य कार्यं— तस्य पकारस्य अभावे गुणस्य अवरोधः भवति |

इत्–संज्ञक–शकारस्य कार्यं कथं भवति इति अधुना सूत्रसहितां व्याख्यां जानीमः | सूत्र–दृष्ट्या पकारस्य कार्यं कथं भवति ?

भ्वादिगणे, विकरणप्रत्ययस्य पकारस्य उपस्थितौ गुणकार्यार्थम् अनुमतिः अस्ति— अतः सारल्यार्थं भ्वादिगणे पकार–संबद्ध–सूत्रसहित–चर्चा न जाता | परन्तु तुदादिगणे, पकारस्य अभावे गुणावरोधः | स च अवरोधः कथम् इति अवश्यं द्रष्टव्यम् | लिख्–धातोः उदाहरणम् अत्र अवलोकयाम—

| | |
|---|---|
| १. लिख् | [लट्लकार–विवक्षायां, प्रथमपुरुषैकवचने; विकरणप्रत्ययस्य योजने] |
| २. लिख् + श + ति | [**लशक्वतद्धिते** इत्यनेन सूत्रेण शकारस्य इत्संज्ञा, **तस्य लोपः** इत्यनेन शकार–लोपः] |

३. लिख् + अ + ति

श ('अ') शित् अस्ति अतः **तिङ्-शित्सार्वधातुकम्** इत्यनेन सूत्रेण श-प्रत्ययः सार्वधातुक-संज्ञकः अपि अस्ति | **पुगन्तलघूपधस्य च** इत्यनेन सूत्रेण लिख्-धातोः उपधायां ह्रस्व-इकारस्य गुण-प्रसक्तिः अस्ति | अतः अनेन "लेखति" इति स्यात् |

किन्तु श-विकरणप्रत्ययः न केवलं शित्, अपि तु **अपित्** |
**अपित्** = यस्मिन् इत्-संज्ञकः पकारः नास्ति, सः अपित् इति उच्यते |
[विकरणप्रत्ययः श शित् अस्ति इति स्मरतु | नाम, यद्यपि शकारस्य लोपः जातः, तथापि शकारस्य प्रभावः अस्ति एव यतः लोपः इत्युक्ते अदृश्यः, न तु अपगतः | परन्तु तुदादिगणे, विकरणप्रत्ययस्य पकारः नासीत् एव | पकार-लोपः इति न; पकारः नास्ति एव | अतः श-विकरणप्रत्ययः अपित् इति उच्यते |]

४. **सार्वधातुकमपित्** (१.२.४) [अपित् = ङित्]

अनुवृत्ति-सहितं सूत्रम्— **सार्वधातुकम् अपित् ङित्** | अर्थः एवम्— अपित् सार्वधातुकम् ङित् इव अस्ति | अयम् "अतिदेशः" इत्युच्यते | अतिदेशः नाम यस्य स्वभावः तथा नास्ति, सः "तथा भवतु" इति विधानम् | यथा "सिंहो माणवकः"— माणवकः (बालकः) सिंहः नास्ति परन्तु वीरो माणवकः सिंहः इव, अतः माणवके सिंहस्य वीरलक्षणम् अध्यारोपितम् |

यस्मिन् प्रत्यये ङकारस्य इत्-संज्ञा अस्ति, सः प्रत्ययः ङित् (यस्य ङकारः इत्, सः ङित्) | ङित् प्रत्ययानां किञ्चन विशिष्टं कार्यम् अस्ति | तत् किं कार्यम् इति सम्प्रति उच्यते; अत्र तावदेव अवगच्छतु— **सार्वधातुकमपित्** इति सूत्रेण यः प्रत्ययः अपित्, सः यद्यपि साक्षात् ङित् नास्ति, तथापि ङित् इव भवति | अतः यथा ङित्-प्रत्ययः कार्यं करोति, तथा अपित्-प्रत्ययः अपि कार्यं करोतु | तच्च कार्यं किम् इति इदानीं पश्याम |

५. **क्क्ङिति च** (१.१.५) [गुण-बाधकं सूत्रम्]

अनुवृत्ति-सहितं सूत्रम्— **क्क्ङिति च इकः गुणवृद्धी न** | यः प्रत्ययः गित्, कित् अथवा ङित् अस्ति, अपि च तस्य प्रत्ययस्य कारणात् अङ्गे इकः स्थाने गुणः अथवा वृद्धिः भवति स्म, सः न भवति | गुणस्य वृद्धेः च बाधकं सूत्रं इदम् | (सम्प्रति अस्माकम् अवधानं गुणे, न तु वृद्धौ |)

"क्क्ङिति" सप्तम्यन्तं हलन्तं पदम् | तस्य अर्थः एवम्— ग् च क् च ङ् च ते इत्-संज्ञक-वर्णाः यस्य सः प्रत्ययः क्क्ङित् | तस्मिन् इति | सप्तम्यन्तं यतः कार्यं तस्मात् पूर्वं भवति स्म; तस्मात् प्रत्ययात् पूर्वम् इकः गुणः च वृद्धिः च न भवति |

६. **सार्वधातुकमपित्** इत्यनेन सूत्रेण यः प्रत्ययः अपित्, सः ङित् इव अस्ति | अतः यत् कार्यं ङित् प्रत्ययः करोति, तदेव कार्यं अपित् प्रत्ययः अपि करोति | तुदादिगणे श-विकरणप्रत्ययः अपित् अस्ति, अतः ङित् इव कार्यं करोति | नाम, गुण-बाधकं-कार्यं करोति |

७. गुणाभावे, वर्णमेलने लिख् + अ + ति → लिखति इति भवति |

तर्हि सारांशः एवं यत् यत्र विकरणप्रत्यये पकारः नास्ति, तत्र शकारस्य गुणार्थं प्रेरणादायिनी शक्तिः अवरुद्धा भवति | तुदादिगणे, विकरणप्रत्यये गुणार्थं प्रेरणादायकः शकारः अस्ति, किन्तु स च शकारः स्वस्य कार्यं कर्तुं न अर्हः यतः इत्-संज्ञक-पकारस्य अभावे गुणार्थं बाधा भवति |

<u>पूर्णसूत्रार्थः</u>

**सार्वधातुकमपित्** (१.२.४) = सार्वधातुकं यदपित् तद् ङिद्वत् भवति | सार्वधातुकम् प्रथमान्तम्, अपित् प्रथमान्तं, द्विपदमिदं सूत्रम् | **गाङ्कुटादिभ्योऽञ्णिन्ङित्** (१.२.१) इत्यस्मात् **ङित्** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **सार्वधातुकम् अपित् ङित्** |

**क्क्ङिति च** (१.१.५) = यः प्रत्ययः गित्, कित् अथवा ङित् अस्ति, अपि च तं प्रत्ययं निमित्तीकृत्य इकः स्थाने गुणः अथवा वृद्धिः भवति स्म, सः (गुणः वृद्धिः) न भवति | ग् च क् च ङ् च तेषाम् इतरेतरद्वन्द्वः क्क्ङः; क्क्ङः इतः यस्य सः क्क्ङित्, तस्मिन् परे

क्क्ङति | द्वन्द्वगर्भबहुव्रीहिसमासः | अत्र ग्–स्थाने ककारः **खरि च** इत्यनेन चर्त्वसन्धिः | क्क्ङति सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **इको गुणवृद्धी** (१.१.३) इत्यस्य पूर्णतया अनुवृत्तिः; **न धातुलोप आर्धधातुके** (१.१.४) इत्यस्मात् **न** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **क्क्ङति च इकः गुणवृद्धी न** |

पाणिनीयसूत्राणि षड्विधा—

संज्ञा च परिभाषा च विधिर्नियम एव च |
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् |

**क्क्ङति च** (१.१.५) निषेधकं सूत्रम्; नाम अनेन कार्यं निषिध्यते | निषेधकं सूत्रं विधिसूत्रेषु अन्तर्भवति |

**सार्वधातुकमपित्** (१.२.४) कीदृशं सूत्रम् ?

Swarup – August 2012 (Updated Oct 2014 & Dec 2015)